# CC-4,Section-B,Unit-3

१.स्थितप्रज्ञः कः?

उत्तरम्-यदा आत्मना आत्मनि तुष्टः नरः सर्वान् मनोगतान् कामान् प्रजहाति तदा सः स्थितप्रज्ञः उच्यते।

२. 'प्रजहाति............' एतद् वाक्यम् कः उवाच?

उत्तरम्- 'प्रजहाति............' एतद् वाक्यम् श्रीभगवानुवाच।

३.राजसी बुद्धिः का अस्ति?

उत्तरम्- यया बुद्ध्या अधर्मम् धर्मम् ,कार्यं य अकार्यमेव अयथावत् प्रजानानि सा बुद्धिः राजसी बुद्धिः ।

४. 'यया.............' इति कः कं प्रति अवदत्?

उत्तरम्-'यया.............' इति वासुदेवः श्रीकृष्णः अर्जुनं प्रति अवदत् ।

५.तामसी बुद्धिः का? Or तमसावृता बुद्धिः इत्युक्ते का?

उत्तरम्- तमोगुणः जायते अज्ञानतः ।एषः गुणः जीवात्मानं मोहग्रस्थं कृत्वा अधर्मम् धर्मम् इति मन्यते ।तमसावृता सर्वान् अर्थान् विपरीतांश्च मन्यते या बुद्धिः सा तामसी बुद्धिः ।

६.तमसावृता इत्युक्ते किम्?

उत्तरम्- तमगुणयुक्ता या सा तमसावृता ।

७.श्रीमद्भगवद्गीतायाः प्रथमाध्यायस्य नाम किम्?

उत्तरम्- श्रीमद्भगवद्गीतायाः प्रथमाध्यायस्य नाम – अर्जुन-विषादयोगः अस्ति ।

८.धृतराष्ट्रः युद्धस्य वार्ता कस्मात् श्रुतवान्?

उत्तरम्- धृतराष्ट्रः युद्धस्य वार्ता सञ्जयात् श्रुतवान्।

अथवा

धृतराष्ट्रः युद्धस्य वार्ता सञ्जयतः प्राप्तवान्।

९.सञ्जयः क आसीत्?

उत्तरम्- सञ्जयः विदुरस्य पुत्रः।

१०. 'अहोवत महत् पापम् कर्तुम् व्यवसिता वयम्' अस्य वक्ता कः? किमस्ति महत् पापम्? के महत् पापम् कर्तुम् व्यवसिताः?

उत्तरम्-'अहोवत महत् पापम् कर्तुम् व्यवसिता वयम्' अस्य वक्ता अर्जुनः।

- स्वजनवधः हि महत् पापम्।
- पाण्डवाः महत् पापम् कर्तुम् व्यवसिताः।

११.श्रीमद्भगवद्गीतायाः चतुर्थाध्यायस्य नाम किं?

उत्तरम्- श्रीमद्भगवद्गीतायाः चतुर्थाध्यायस्य नाम ज्ञानयोगः।

१२.कर्माकर्मयोः ज्ञाने के मोहिता?

उत्तरम्- कर्माकर्मयोः ज्ञाने कवयः मोहिता।

१३.कर्म कतिविधानि सन्ति ?

उत्तरम्- कर्म त्रिविधानि सन्ति।

- कर्म,अकर्म,विकर्मश्च।

१४.श्रीमद्भगवद्गीतायाः द्वितीयाध्यायस्य नाम किम्? अस्य अर्थः कः?

उत्तरम्- श्रीमद्भगवद्गीतायाः द्वितीयाध्यायस्य नाम सांख्ययोगः ।अस्यार्थः ज्ञानम् ।

१५.कोऽस्ति कुरुवन्दनः गीतायाम्?

उत्तरम्-अर्जुनः अस्ति कुरुवन्दनः गीतायाम् ।

१६.बुद्ध्यः कतिविधाः सन्ति? ताः काः?

उत्तरम्- बुद्ध्यः त्रिविधाः सन्ति । ता यथा सात्विकी राजसी तामसी च ।

१७.इन्द्रियाणि कतिविधानि सन्ति ?

उत्तरम्- इन्द्रियाणि त्रिविधानि सन्ति ।

- १.ज्ञानेन्द्रियाणि(चक्षुरादि)
  २.कर्मेन्द्रियाणि (वाक्पादादौ)
  ३.अन्तरिन्द्रियम् (मनः)

१८.आहाराः कतिविधाः? के ते ?

उत्तरम्- आहाराः त्रिविधाः सन्ति ।

- सात्विकाहारः,राजसिकाहारः,तमसिकाहारश्च ।

१९. 'आहारः' पदस्य व्युत्पत्तिः का?

उत्तरम्- आ उपसर्गपूर्वकात् हृ धातोः अनन्तरम् घञ- प्रत्ययेन निष्पन्नम् 'आहारः' इति पदम् ।

२०.'सात्विकप्रियाः आहारः' अस्य व्याख्या लिख्यताम् ।केषाम् प्रियाः भवन्ति एते?

उत्तरम्- आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धा स्थिरा हृद्या आहाराः सात्विकाप्रियाः ।एते आहाराः सात्विकानां प्रियाः भवन्ति ।

२१.राजसिकाहाराः कीदृशाः भवन्ति?

उत्तरम्- राजसिकाहाराः हि दुःखशोकमयप्रदाः भवन्ति।

२२.शारीरंतपः इत्युक्ते किम्?

उत्तरम्-देवद्विजगुरुप्राज्ञपूजनं शोचमार्जवम् ब्रह्मचर्यम्हिंसा च शरीरंतपः उच्यते।

२३.तपः कतिविधानि सन्ति ?तानि कानि?

उत्तरम्- त्रिविधानि तपः ।वाचिकतपः ,मानसिकतपः, शारीरिकतपञ्च।

२४.वायिकतपः किम्?

उत्तरम्- वाणीसम्बन्धीयम् तपः हि वाचिकतपः उच्यते।

२५.मानसं तपः किम्?

उत्तरम्- मनः सम्बन्धीयम् तपः हि मानसं तपः कथ्यते।

२६.व्यवहारेण कस्य तपसः कार्यम् भवति?

उत्तरम्- व्यवहारेण वाचिकतपसः कार्यम् भवति।

२७.सांख्यशब्दस्य अर्थः किम्?

उत्तरम्- सांख्यशब्दस्य अर्थः ज्ञानम्।

२८. 'क्षात्रधर्म' इत्युक्ते किम्?

उत्तरम्- क्षत्रस्य धर्मः क्षात्रधर्मः। युद्धे प्रतिपक्षान् विनाशं करोति यः स क्षत्रः ।तस्य धर्मरेव क्षात्रश्रमः।

२९.कुरुनन्दनः कः आसीत्?

उत्तरम्- अर्जुनः कुरुनन्दनः आसीत्।

३०.महाभारतस्य कस्मिन् पर्वे गीता उल्लिखिता?

उत्तरम्- महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता उल्लिखिता।

३१.धृतराष्ट्रः कस्मात् कुरुक्षेत्रस्य युद्धस्य वर्णानां श्रुतवान् ?

उत्तरम्- धृतराष्ट्रः सञ्जयस्य मुखात् कुरुक्षेत्रस्य कुरुक्षेत्रस्य युद्धस्य वर्णानां श्रुतवान्।

३२. 'भयङ्करं पापकार्यम्' अर्जुनस्य मते किमस्ति?

उत्तरम्- अर्जुनस्य मते आत्मीयवर्गस्य हत्याकार्यमेव भयङ्करं पापकार्यम् अस्ति।

३३.अर्जुनस्य रक्तसम्बन्धीयाः आत्मीयजनाः के आसन् ?

उत्तरम्- अर्जुनस्य रक्तसम्बन्धीयाः आत्मीयजनाः कौरवाः आसन्।

३४.कर्मतत्वस्य उपदेशः केन कृतः?

उत्तरम्- कर्मतत्वस्य उपदेशः श्रीकृष्णेन कृतः।

३५. 'कर्माकर्मज्ञाने' कः आसीत् मोहितः?

उत्तरम्- 'कर्माकर्मज्ञाने' अर्जुनः मोहितः आसीत्।

३६.गीतायां अर्जुनस्य बुद्धिः केन सह तुल्यते?

उत्तरम्- गीतायां अर्जुनस्य बुद्धिः मोहरूपेण दुस्तरेण कर्दमेन सह तुल्यते।

३७. यदा बुद्धि मोहकलिलं व्यतितरिष्यति तदा अर्जुनः किं लभिष्यति?

उत्तरम्-यदा बुद्धि मोहकलिलं व्यतितरिष्यति तदा अर्जुनः श्रीतव्यस्य श्रुतस्य च निर्वेदम् लभिष्यति।